# ॥ त्रिपुरसुन्दरी प्रातस्स्मरणम् ॥

प्रातर्नमामि जगतां जनन्याः चरणाम्बुजम् ।
श्रीमत् त्रिपुरसुन्दर्याः वन्दिताया हरादिभिः ॥
प्रातस्त्रिपुरसुन्दर्याः व्रजामि चरणाम्बुजम् ।
हरिर्हरो विरिञ्चिश्च सृष्ट्यादीन् कुरुते यया ॥
प्रातस्त्रिपुरसुन्दर्याः नमामि पदपङ्कजम् ।
यत्पाद्यमम्बु शिरसि भाति गङ्गा महेशितुः ॥
प्रातः पाशाङ्कुश शर चापहस्तां नमाम्यहम् ।
उद्यदादित्यसङ्काशां श्रीमत् त्रिपुरसुन्दरीम् ॥
प्रातर्नमामि पादाब्जं ययेदं भासते जगत् ।
तस्याः त्रिपुरसुन्दर्याः यत्प्रसादान्निवर्तते ॥
यः श्लोक पञ्चकमिदं प्रातर्नित्यं पठेन्नरः ।
तस्मै दद्यात् आत्मपदं श्रीमत् त्रिपुरसुन्दरी ॥
कामेश्वरीं परां ईडे कादिहादिस्वरूपिणीं
मातृकावर्णलिप्ताङ्गी महाश्रीचक्रमध्यगां

© Bhaskara Prakasha Ashram

आनन्दं आनन्दकरं प्रसन्नं ज्ञानस्वरूपं निजबोधसत्वं
योगीन्द्रमीढ्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि ।

त्रैलोक्यचैतन्यमये परेशि श्रीसुन्दरि त्वच्चरणाज्ञयैव ।
प्रातः समुत्थाय तव प्रियार्थं संसारयात्रां अनुवर्तयिष्ये ॥
संसारयात्रां अनुवर्तमानं त्वदाज्ञया श्रीत्रिपुरे परेशि ।
स्पर्धा तिरस्कार कलिप्रमाद भयानि माम् माभिभवन्तु मातः ॥
जानामि धर्मं न च मे प्रवृत्तिः जानाम्यधर्मं न च मे निवृत्तिः ।
त्वया हृषीकेशि हृदिस्थयाऽहं यथा नियुक्तोऽस्मि तथाकरोमि ॥

© Bhaskara Prakasha Ashram